संस्कृतवार्ता:

27.08.2024

सायम् - 06:20

मुख्यवार्ता:

· प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य रशियादेशस्य राष्ट्रपतिना व्लादिमिर्-पुतिन् इत्यनेन सह रशिया-युक्रेनोर्मध्ये प्रवर्तमानं सङ्घर्षम् अधिकृत्य सम्वादः कृतः।

· विदेशमंत्री डॉ० सुब्रह्मण्यम जयशंकर: ब्राजिल-देशस्य जी-विंशति-समूहस्य अध्यक्षतायै भारतस्य पूर्ण-सहयोगं समाश्वासितवान्।

· कोलकाता नगरे नब्बना-अभिजन-जनयात्राया: अवधौ आरक्षिबलानाम् प्रदर्शनकारि-छात्राणां च मध्ये संघर्ष: सञ्जात: इति सूचना प्राप्ता।

· सर्वोच्चन्यायालयेन दिल्लीराज्ये कथिते मद्य-नीति संबंधिते भ्रष्टाचार-धनशोधन-प्रकरणे भारत राष्ट्र समिति इत्यस्य दलस्य नेत्री के० कवितायै कारावास-मुक्ताज्ञा प्रदत्ता।

· जम्मू-कश्मीर-केन्द्रशासित-प्रदेशे विधानसभा-निर्वाचनस्य प्रथम-चरणाय नामांकनं अद्य सायंकाले संपन्नं भविष्यति।

· भारतीय-पैरालम्पिक-क्रीडकाः इत्येतेषां चतुरशीति-सदस्यानां दलं श्वः समारभ्य पेरिसनगरे आयोक्ष्यमाणासु क्रीडासु पदकानि विजितुं तत्पराः सज्जाः च सन्ति ।

नरन्द्रमोदी-पुतिन-सम्वादः

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य रशियादेशस्य राष्ट्रपतिना व्लादिमिर्-पुतिन् इत्यनेन सह रशिया-युक्रेनोर्मध्ये प्रवर्तमानं सङ्घर्षम् अधिकृत्य सम्वादः कृतः। दूरभाषमाध्यमेन जाते अस्मिन् सम्वादे , भारत-रशिया-देशयोः मध्ये सामरिक-सहभागित्वम् इतोऽपि सुदृढं कर्तुं उपायाः चर्चिताः । सामाजिक-संदेशपटले , प्रधानमन्त्री अलिखत् यत् सः श्री-पुतिन-वर्येण सह द्विपक्षीय-सम्बन्धान् सुदृढं कर्तुं स्वस्य अनुभवम् अपि च सद्यः एव जातस्य युक्रेन्-देशस्य यात्रावृत्तम् चर्चितवान् । प्रधानमन्त्रिणा रूस-युक्रेनयोः मध्ये प्रवर्तमान-द्वन्द्वस्य शान्ति-युत-समाधानाय भारतस्य प्रतिबद्धता पुनरुच्चारिता ।

## <u>जयशङ्करः-ब्राजील</u>

विदेशमंत्री डॉ0 सुब्रह्मण्यम जयशंकर: ब्राजिल-देशस्य जी-विंशति-समूहस्य अध्यक्षतायै भारतस्य पूर्ण-सहयोगं समाश्वासितवान्। विदेशमंत्री डॉ0 सुब्रह्मण्यम जयशंकर: अथ ब्राजील-देशस्य विदेशमंत्री मौरो वियरा अद्य नव-दिल्ल्यां नवसंख्यकस्य भारत-ब्राजील-संयुक्त-आयोगस्य उपवेशनस्य सह-आध्यक्षत्वं कुर्वन्नासीत। उपवेशनात् पूर्वं डॉ0 जयशंकरः उक्तवान् यत् अस्मिन् अवसरे सकारात्मकायाः चर्चायाः महति संभावना वर्तते । मंत्रिद्वयं भारतस्य अध्यक्षतायां सम्पन्नस्य गतवर्षस्य शिखर-सम्मेलनस्य जी-विंशति इत्यस्य मुख्योपलब्धय: वरिवर्धनाय चर्चां विधास्यति। वर्तमान-समये ब्राजील-देशं जी-विंशति-समूहस्य अध्यक्षत्वं वदधाति। ऐषम: वर्षस्य नवम्बर-मासस्य अष्टादशत: एकोनविंशति दिनांक पर्यंतं जी-विंशति शिखर-सम्मेलनस्य आयोजनों रियो-दि- जिनेरो-नगरे भविष्यति। भारत-ब्राजील-देशौ पारस्परिक-मूल्येषु बहुआयामी-संबंधानां आदान-प्रदानं कुरुतः । विदेश-मंत्रालयानुसारं ब्राजिलस्य विदेश मंत्री वियरावर्यस्य ऐषा यात्रा षडाधिक-द्विसहस्रतमे वर्षे संस्थापिते रणनीतिक-सहयोगं इतोऽपि सशक्तं करणाय सुअवसरं प्रददाति इति। श्री वियराया: एषा यात्रा द्विपाक्षिकेषु-संबंधेषु, क्षेत्रीयेषु-विषयेषु विभिन्नेषु क्षेत्रेषु च बहुपाक्षिक-पटलेषु भारत-ब्राजिलयोः मध्ये सहयोगस्य नूतन-संभावनानां गवेषणायै अवसरं प्रददाति।

## <u>विदेशमन्त्रालयः-मालदीव्स्</u>

विदेशमन्त्रालयस्य उच्च-स्तरीय-प्रतिनिधिदलं द्वीपसमूहे विकास-सहयोग-परियोजनानां प्रगतिं समीक्षितुं माल्दीव-देशे अस्ति। विशेषसचिवः वित्त-परामर्शदः च अनुराग-अग्रवालः इत्यस्य नेतृत्वे प्रतिनिधिदलेन, माल्दीव-देशस्य मन्त्रिभिः, सर्वकारस्य वरिष्ठैः अधिकारिभिः च सह सार्थक-संवादः आचरितः। प्रतिनिधिमण्डलेन स्थलदर्शनं विधाय भारतीय-परियोजनानां प्रगतिः अपि समीक्षिता । प्रतिनिधिदलं श्वः यावत् माल्दीव-देशे अस्ति।

## <u>कोलकाता-प्रदर्शनम्</u>

कोलकातानगरे, छात्र-सङ्घटनानि नबन्ना-अभियानस्य जनसभां कर्तुं दृढसङ्कल्पिताः दृश्यन्ते । आरक्षकैः अनुमतिः न प्रदत्ता आसीत् तदापि, पश्चिमवङ्ग-छात्रसमाजः, सङ्ग्रामी-जोथा-मञ्चः च इति छात्रसङ्घटन-द्वयेन आरक्षकाणां अनुमतिं विना एव सभायाः आयोजनस्य उद्घोषणा कृता

अस्ति । एतानि सङ्घटनानि आर. जी. कर-चिकित्सा-महाविद्यालयस्य चिकित्सालयस्य च चिकित्सिकया सह जाते कथित-दुष्कर्म-हत्या-प्रकरणे मुख्यमन्त्रिणः ममता-बनर्जी इत्यस्याः त्यागपत्रम् अयाचन्। विश्वसनीयसूत्रैः सूचना प्रदत्ता यत् जनसभायाः समये अराजक-तत्वानि उपद्रवं, हिंसाम्, अव्यवस्थां च समुत्पादयिष्यन्ति इति पश्चिम-बङ्गालस्य आरक्षकैः प्रतिपादितम्। राज्यसर्वकारेण पूर्वमेव बी. एन्. एस्. एस्. इत्यस्य त्रिषष्ट्युत्तरैकशतं इति धारायाः अन्तर्गतं नबन्ना इत्यस्य समीपे निषेधात्मकाज्ञाः प्रावर्तिताः सन्ति । पञ्च वा अधिकानां जनानां परस्पर-समागमं निषिद्धम् अस्ति। कोलकाता-नगरस्य वीथिषु षट्-सहस्राधिकाः आरक्षकाः नियोजिताः वर्तन्ते । विधि-व्यवस्थायाः रक्षणार्थं नवदश-स्थानेषु अवरोधकानि स्थापितानि सन्ति। अस्मिन् क्षेत्रे आहत्य षड्-विंशतिः आरक्षकोपायुक्ताः नियोजिताः सन्ति। अनेकाभिः शिक्षण-संस्थाभिः अद्य अवकाशः समुद्घोषितः । राज्यपालः सी. वी. आनन्दबोसः जनसभायाः दमनार्थं बलप्रयोगं न कर्तुं राज्यसर्वकाराय आदेशं दत्तवान्।

<u>कवीता-बीआरएस</u>

सर्वोच्चन्यायालयेन दिल्लीराज्ये कथिते आबकारी-नीति-प्रकरणे संबंधिते भ्रष्टाचार-धनशोधन-प्रकरणे भारत राष्ट्र समिति इत्यस्य दलस्य नेत्री के. कवितायै कारावास-मुक्ताज्ञा प्रदत्ता।

<u>जम्मूकश्मीर-विधानसभानिर्वाचनम्</u>

जम्मू-कश्मीर-केन्द्रशासित-प्रदेशे विधानसभा-निर्वाचनस्य प्रथम-चरणाय नामांकनं अद्य संपन्नं भविष्यति। प्रदेशे प्रथमचरणे षड्जनपदानां चतुर्विंशति आसनेषु सितम्बरमासस्य अष्टादश-दिनांके मतदानं भविष्यति। नामांकन-पत्राणां परिपरीक्षा श्वः भविष्यति। प्रदेशे अन्यानां द्विचरणानां मतदानं सितम्बरमासस्य पञ्चविंशति दिनांके अथ अक्टूबरमासस्य प्रथमे दिनांके भविष्यति। निर्वाचनस्य परिणामानि अक्टूबरमासस्य चतुर्थ-दिनांके प्रसारितानि भविष्यन्ति।

<u>भाजपादलम्-सदस्यताभियानम्</u>

भारतीय-जनता-पार्टीति दलं सितम्बर-मासस्य द्वि-दिनाङ्कात् आरभ्य सदस्यता-अभियानम् समारप्स्यति । अद्य नवदिल्ल्यां प्रसार-माध्यमान् सम्बोधयन् भाजपा-दलस्य महासचिवः विनोद-तावडे इत्येषः अवदत् यत् सर्वैः विद्यमान-सदस्यैः स्वसदस्यतायाः नवीकरणम् पुनरपेक्ष्यते इति ।

## गुजरात-अतिवृष्टिः

भारतस्य ऋतु-विज्ञान-विभागेन राजस्थान-राज्योपरि निर्मिते अति-निम्न-वायुदाब-केन्द्रस्य कारणेन अद्य नैकैषु जनपदेषु भीषण-वृष्टेः आशंकायै रक्त-वर्णा संचेतता प्रसारिता। अद्य दक्षिण-राजस्थानस्य केषुचित् स्थानेषु अति-भीषण-वृष्टेः अनुमानमपि प्रसारितम्।

## भारतीय-पैरा-एथिलीट्-पेरिसनगरम्

भारतीय-पैरालम्पिक-क्रीडकाः इत्येतेषां चतुरशीति-सदस्यानां दलं श्वः समारभ्य पेरिसनगरे आयोक्ष्यमाणासु क्रीडासु पदकानि विजितुं तत्पराः सज्जाः च सन्ति । अद्यपर्यन्तं पैरालम्पिक-क्रीडायां प्रेषितम् इदं भारतस्य बृहत्तमं दलम् अस्ति । एकविंशत्यधिक-द्विसहस्रतमे वर्षे टोक्यो-पारालिम्पिक्-क्रीडायां भारतं पञ्च सुवर्ण-पदकानि समेत्य नव-दश पदकानि प्राप्य समग्र-श्रेणीषु चतुर्विंशति-तमं स्थानम् अवाप्नोत्।

।। इति वार्ताः।।